# APEEJAY SCHOOL, SCHOOL, SHEIKH SARAI-I
## SANSKRIT
## CLASS – X

निर्धारित समय : होरात्रयम् पूर्णाङ्कः 90

**निर्देशाः**

(i) प्रश्नपत्रे चत्वारः खण्डाः सन्ति :

खण्डः (क) अपठित-अवबोधनम् - **10 अङ्काः**

खण्डः (ख) रचनात्मक-कार्यम् - **15 अङ्काः**

खण्डः (ग) अनुप्रयुक्त-व्याकरणम् - **30 अङ्काः**

खण्डः (घ) पठित-अवबोधनम् - **35 अङ्काः**

(ii) सर्वे प्रश्नाः **अनिवार्याः**।

(iii) प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि।

(iv) प्रश्नसंख्या अवश्यं लेखनीया।

(v) उत्तराणि संस्कृतेन एव लेखनीयानि।

**खण्डः (क)**
**अपठित-अवबोधनम् (10 अङ्काः)**

**1. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत।**

भारतवर्षे सर्वासु वनस्पतिषु तुलसी-पादपः आदरेण सह पूज्यते। अयं पादपः असंख्यकैः गुणैः सम्पन्नः। अस्य काष्ठं पत्राणि च स्वास्थ्यकारीणि रोगरोधकानि आयुवर्धकानि च विद्यन्ते। तुलसी तु भगवतः विष्णोः प्रिया सहचरी। अतएव सा 'विष्णुकान्ता', 'केशवप्रिया', 'विष्णुप्रिया' आदिभिः नामभिः अपि प्रसिद्धा। तुलस्याः अपरं प्रमुखं नाम 'वृन्दा' अपि अस्ति। अस्याः तुलस्याः महिमा चिकित्साक्षेत्रे अपि गरीयसी। प्रभातवेलायां प्रथमं तुलसीपत्राणां सेवनं हृदयरोगे लाभकारी भवति। तुलस्याः निर्मितः क्वाथः कफजन्यदोषं कासं च दूरीकरोति। तुलसीपत्राणि यदि जले निक्षिप्य तेन जलेन स्नायते तत् तु त्वक्-रोगान् नाशयति। कृष्णस्य लीलाक्षेत्रे वृन्दावने सर्वत्र वृन्दायाः एव पादपाः आसन् अतएव तत्स्थानं वृन्दावनम् जातम्। प्रत्येकं गृहे सुलभः अस्याः पादपः। तस्यै तुलस्यै नमः।

**प्रश्नाः**

**I. एकपदेन उत्तरत।**

(i) तुलस्याः महिमा कस्मिन् क्षेत्रे गरीयसी? **½x4=2**

(ii) प्रभातवेलायां तुलसीपत्राणां सेवनं कस्मिन् रोगे लाभप्रदं भवति?

(iii) तुलसी कस्य सहचरी?

3. मञ्जूषायां प्रदत्तशब्दानां सहायतया चित्रं दृष्ट्वा पञ्चवाक्यानि संस्कृतेन लिखत। 2x5=10



| | |
|---|---|
| मञ्जूषा - | गृहे, 'ताजमहल', अम्बा, स्यूतः, मातामही, मातामहः, कारयानेन, आगरानगरे,द्रष्टुम्, धारयित्वा, मातापितरौ, सह |

अथवा

'पर्वतीयस्थलम्' इति विषयम् अधिकृत्य मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्चवाक्यानि संस्कृतेन लिखत। 2x5=10

| |
|---|
| मञ्जूषा - पर्वतीयस्थलम्, ग्रीष्मावकाशे, जनाः, स्वास्थ्यलाभाय, आगच्छन्ति, स्वच्छं, वायुः,सूर्यः, वृक्षाः, पुष्पाणि, पर्यटनाय, शीतलवायुः, मनोरञ्जनम्, मित्रैः सह |

## खण्डः 'ग'

## अनुप्रयुक्त-व्याकरणम् ( 30 अङ्काः )

4. I. अधोलिखितवाक्येषु रेखाङ्कितपदानां समुचितं सन्धिं विच्छेदं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत। 1x3=3

(i) यस्य मानसं शुद्धं सः <u>शुचिरिह</u>।

(अ) शुचि+रिह (ब) शुची+इह

(स) शुचिः+इह (द) शुचि+इह

(ii) <u>'कामक्रोध+उद्भवम्'</u> वेगं यः सहते सः युक्तः।

(अ) कामक्रोधूद्भवम् (ब) कामक्रोधोद्भवम्

(स) कामक्रोधौद्भवम् (द) कामक्रोधः उदभवम्

(iii) <u>दास्यामीति</u> प्रतिज्ञाय यः मनः अन्यथा कुरुते।

(अ) दास्यामि+इति (ब) दास्यामी+ति

(स) दास्यामी+इति (द) दास्यामि+ईति

II. अधोलिखितवाक्येषु रेखाङ्कितपदानां सन्धिं विच्छेदं वा कुरुत- 1x2=2

(i) पदच्छेदः तु सुस्वरः धैर्यं च पाठकस्य गुणाः।

(ii) तत्+श्रुत्वा यूथपतिः उक्तवान्।

5. I. अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत - 1x4=4

(i) यूथपः वानरान् अवदत्।

(अ) यूथं पिबति इति (ब) यूथं पाति इति

(स) यूथस्य पति इति (द) यूथस्य पः इति

(ii) सत्यसमं तपः नास्ति।

(अ) सत्येन समम् (ब) सत्यस्य समम्

(स) सत्यात् समम् (द) सत्यं समम्

(iii) दुग्धधवलं वस्त्रम् आनय।

(अ) दुग्धं धवलं (ब) दुग्धम् इव धवलम्

(स) दुग्धेन धवलं (द) धवलं दुग्धं

(iv) इदं क्रीडनकम् पञ्चानाम् अङ्गुलीनाम् समाहारः अस्ति।

(अ) पञ्चाङ्गुलम् (ब) पञ्चाङ्गुलयः

(स) पञ्चाङ्गुलिः (द) पञ्चाङ्गुलः

II. अधोलिखितयोः वाक्ययोः समासं विग्रहं वा कृत्वा लिखत। 1x2=2

(i) शुद्धम् उदकम् उपादेयम् अस्ति।

(ii) इदं त्रिरत्नम् अस्ति।

6. I. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति प्रत्ययौ संयोज्य विभज्य वा समुचितम् उत्तरं प्रदत्तविकल्पेभ्यः चित्वा लिखत। 1x3=3

(i) मम भ्राता गुण+मतुप् अस्ति।

(अ) गुणवन्तः (ब) गुणमान्

(स) गुणवान् (द) गुणमत्

(ii) इदं स्थानं अवश्यं दर्शनीयम्।

(अ) दृश्+अनीयर् (ब) दृश्+नीयर्

(स) दर्श+अनीयर् (द) दर्शनीय+अनीयर्

(iii) सः नेत्रदानी अस्ति।

(अ) नेत्रदान+ई (ब) नेत्रदान्+ई

(स) नेत्रदान+इनि (द) नेत्रदानी+ई

II. अधोलिखितवाक्ययोः रेखाङ्कितपदयोः प्रकृतिप्रत्ययौ संयोज्य विभज्य वा लिखत। 1x2=2

(i) इदं दैनिकं समाचारपत्रम् अस्ति।

(ii) बालिकाभिः राष्ट्रगीतं गै+तव्यत्।

7. प्रदत्तविकल्पेभ्यः उचितम् अव्ययपदं चित्वा वाक्येषु रिक्तस्थानानि पूरयत। 1x5=5

(i) ______ चाणक्यः नामधेयः अर्थशास्त्री आसीत्।

(ii) कक्षायाम् ______ मा वद

(iii) नगरात् बहिः ______ रेलस्थानकम् अस्ति।

(iv) बालकाः ______ क्रीडन्ति।

(v) यथा राजा ____ प्रजा।

| मञ्जूषा - विना, पुरा, यदा, इतस्ततः, एव, इव उच्चैः, तथा |
|---|

8. I. अधोलिखितसंवादे रिक्तस्थानानि वाच्यानुसारं प्रदत्तविकल्पेभ्यः उचितं पदं चित्वा पूरयत। 1x3=3

रमा – निशे! तव अम्बा कुत्र गच्छति?

निशा – मम अम्बया देवालय __(i)__।

(अ) गम्यते (ब) गम्यते

(स) गम्यन्ते (द) गच्छति

रमा – किं त्वमपि तत्र देवान् __(ii)__?

(अ) नमति (ब) नमसि

(स) नम्यते (द) नम्यसे

निशा – आम् मया तत्र __(iii)__ प्रणम्यन्त।

(अ) देवान् (ब) देवः

(स) देवाः (द) दैवैः

रमा – अहमपि त्वया अम्बया च सह चलिष्यामि।

1x2=2

II. अधोलिखितसंवादे वाच्यानुसारं रिक्तस्थानं पूरयत –

आचार्यः – राघव! त्वं किं पठसि?

राघवः – __(i)__ गीता पठ्यते।

आचार्यः – श्याम! किं त्वं पत्रं लिखसि?

श्यामः – आम्, मया तु पत्रम् एव __(ii)__।

9. भवतः विद्यालये संस्कृतोत्सवः भवति। तत्र कः कार्यक्रमः कतिवादने भविष्यति इति घटिकां दृष्ट्वा रिक्तस्थाने लिखत। 1x4=4

(क) (i) (7:45) ___ वादने प्रातः सरस्वती-वन्दना।

(अ) पादोन सप्त (ब) पादः न सप्त

(स) पादोन अष्ट (द) पादहीनः अष्ट

(ii) (8:00) ___ वादने वाद-विवाद-प्रतियोगिता।

(अ) अष्टमः (ब) अष्टः (स) अष्टम् (द) अष्ट

(ख) (i) (10:15) ___ वादने निर्णयस्य घोषणा।

(ii) (10:30) ___ वादने धन्यवादज्ञापनम्।

## खण्डः-'घ'
## पठित-अवबोधनम् ( 30 अङ्काः )

10. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत।

तच्छ्रुत्वा साश्रुनयनो यूथपतिः सगद्गदम् उक्तवान् – 'रसनास्वादलुब्धाः यूयम् अस्य सुखस्य कुपरिणामं न जानीथ। अहं तु वनं गच्छामि।'

अथ अन्यस्मिन् अहनि स मेषो यावत् महानसं प्रविशति तावत् सूपकारेण अर्धज्वलित-काष्ठेन ताडितः। ऊर्णाप्रचुरः मेषः वह्निना जाज्वल्यमानशरीरः निकटस्थाम् अश्वशालां प्रविशति दाहवेदनया च भूमौ लुठति। तस्य क्षितौ प्रलुठतः तृणेषु वह्निज्वालाः समुत्थिताः।

**प्रश्नाः**

I. एकपदेन उत्तरत। — 1x2=2

(i) सूपकारेण मेषः केन ताडितः?

(ii) तृणेषु का समुत्थिताः?

II. पूर्णवाक्येन उत्तरत। — 2x1=2

सगद्गदम् यूथपतिः किम् उक्तवान्?

III. निर्देशानुसारम् उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत – ½ x2=1

(i) 'मेषः' इति पदस्य विशेषणम् किम् अस्ति?

(अ) रसनास्वादलुब्धाः (ब) प्रलुठतः

(स) वह्निना (द) ऊर्णाप्रचुरः

(ii) 'उक्तवान्' इति क्रियापदस्य कर्तृपदम् अत्र किम्?

(अ) मेषः (ब) यूथपतिः

(स) यूयम् (द) अहं

11. अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत।

भगवन्किमुपादेयम्? गुरुवचनम्, हेयमपि च किम्? अकार्यम्।
को गुरुः? अधिगततत्त्वः शिष्यहितायोद्यतः सततम्।।

**प्रश्नाः**

I. एकपदेन उत्तरत। — 1x2=2

(i) हेयं किमस्ति?

(ii) उपादेयं किम् अस्ति?

II. पूर्णवाक्येन उत्तरत। — 2x1=2

कः गुरुः कथ्यते?

III. निर्देशानुसारम् शुद्धम् उत्तरम् प्रदत्तविकल्पेभ्यः चित्वा लिखत – ½ x2=1

(i) 'निरन्तरम्' इति पदस्य समानार्थकं पदम् अत्र किम्?

(अ) सततम् (ब) हेयम् (स) वचनम् (द) उद्यतः

(ii) 'हेयम्' इति पदस्य विलोमपदं चित्वा लिखत।

(अ) सततम् (ब) वचनम् (स) उपादेयम् (द) अकार्यम्

12. अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत।

अथ कदाचित् दानशालासु विचरन् स राजा बहुधनलाभेन सन्तुष्टानाम् अर्थिनां विरलसंख्याम् अपश्यत्।

राजा – सौभाग्यशालिनः यान् याचकाः शरीरस्य अङ्गानि अपि याचन्ते। (स्वगतम्) मम अर्थिनः तु धनलाभमात्रेण सन्तोषं भजन्ते। नूनं ते दानवीराः सौभाग्यशालिनः यान् याचकाः शरीरस्य अङ्गानि अपि याचन्ते।

(एवं राज्ञः स्वेषु गात्रेष्वपि निरासक्तिं विज्ञाय सकलं ब्रह्माण्डं व्याकुलं सञ्जातम्। राज्ञि एवं विचारयति सति तस्य दानशीलतां परीक्षितुं देवाधिपतिः शक्रः नेत्रहीनयाचकस्य रूपम् अधारयत्।)

शक्रः – हे राजन्! भवतः दानवीरताम् आकर्ण्य आशान्वितः भवत्समीपम् आगतोऽस्मि। देव! रवि-शशि-तारामण्डल-भूषितं जगत् एतत् कथमिव पश्येयम् चक्षुर्हीनः।

प्रश्नाः

I. एकपदेन उत्तरत। 1x2=2

(i) शक्रः कस्य रूपम् अधारयत्?

(ii) के धनलाभमात्रेण सन्तोषं भजन्ते?

II. पूर्णवाक्येन उत्तरत। 1x2=2

(i) दानशालासु विचरन् राजा किम् अपश्यत्?

(ii) राज्ञः स्वेषु गात्रेष्वपि निरासक्त विज्ञाते सति किम् अभवत्?

III. निर्देशानुसारम् शुद्धम् उत्तरं विकल्पेभ्यः चित्वा लिखत- ½ x2=1

(i) 'याचन्ते' इति क्रियापदस्य कर्तृपदम् अत्र किम्?

(अ) शक्रः (ब) राजा

(स) अर्थिनः (द) याचकाः

(ii) 'भवतः दानवीरताम् आकर्ण्य ....' अत्र 'भवतः' सर्वनामपदं कस्मै प्रयुक्तम्?

(अ) शक्राय (ब) इन्द्राय

(स) राज्ञे (द) याचकाय

13. मञ्जूषातः उचितपदानि चित्वा अधोलिखितश्लोकयोः भावार्थं पूरयत। ½ x8=4

I. नास्ति विद्यासमं चक्षुः नास्ति सत्यसमं तपः।
नास्ति रागसमं दुःखं नास्ति त्यागसमं सुखम्।।

भावार्थः अस्मिन् संसारे __(i)__ एव नरस्य नेत्रम् कथ्यते। सत्यस्य पालनं अतिकठिनम्। अतः अनेन समं __(ii)__ न अस्ति। सांसारिकपदार्थेषु आसक्तिः एव __(iii)__ कारणम् किन्तु त्यागस्य भावनया समं __(iv)__ संसारे न अस्ति।

II. तस्मात् स्यात् कलहो यत्र गृहे नित्यमकारणः।
तद्गृहं जीवितं वाञ्छन् दूरतः परिवर्जयेत्।।

भावार्थः यस्मिन् __(v)__ प्रतिदिनं __(vi)__ विना कलहः भवेत् विद्वांसः कथयन्ति – यदि जनाः __(vii)__ वाञ्छन्ति तदा तत् गृहम् __(viii)__ एव परित्यजेत्।

| मञ्जूषा - सुखम्, जीवितुं, गृहे, दुःखस्य, दूरतः, कारणं, विद्या, तपः |
|---|

14\. मञ्जूषातः समुचित पद चित्वा निम्नलिखितश्लोकस्य अन्वयं पूरयत।

I. शक्नोतीहैव यः सोढुं प्राक शरीरविमोक्षणात्।
कामक्रोधोद्भवं वेगं, स युक्तः स सुखी नरः ।।

अन्वय : - यः शरीरविमोक्षणात् __(i)__ कामक्रोधोद्भवं __(ii)__ इह एव __(iii)__ शक्नोति सः नरः __(iv)__ सः सुखी (भवति)

| मञ्जूषा - वेगम् , युक्तः, प्राक्, सोढम्, |
|---|

15\. वाक्येषु रेखाङ्कितपदानां स्थाने उचितं प्रश्नवाचकपदं प्रयुज्य प्रश्ननिर्माणं कुरुत। 1x4=4

(i) <u>लोके</u> चक्षुर्दानं सुदुष्करम्।

(ii) <u>गुरूणां</u> तिरस्करणम् संसारे विषम्।

(iii) <u>शारदा</u> अस्माकं सन्निधिं क्रियात्।

(iv) राजा <u>वैद्यान्</u> आहूय अश्वरक्षार्थम् उपायम् अपृच्छत्।

16\. अधोलिखितवाक्यानि घटनाक्रमेण पुनः लेखनीयानि। ½ x8=4

(i) राजा तस्मै चक्षुर्द्वयम् एव प्रयच्छति।

(ii) सः पुत्रवत् प्रजाः पालयति स्म।

(iii) भगवान् बोधिसत्त्वः शिवीनां राजा बभूव।

(iv) इदम् दृष्ट्वा शक्रः विस्मितः भवति।

(v) तस्य दानशीलतां परीक्षितुं देवराजः इन्द्रः नेत्रहीनयाचकस्य रूपे आगतः।

(vi) पुनः राज्ञः पुरतः उपस्थितः भूत्वा शक्रः तस्मै वरं यच्छति।

(vii) राज्ञः दानशीलतां श्रुत्वा देशान्तरेभ्योऽपि जनाः तत्र आयान्ति स्म।

(viii) सः याचकः एकस्य चक्षुषः दानम् अयाचत।

17\. प्रसङ्गानुसारम् रेखाङ्कित-शब्दानाम् उचितम् अर्थं चित्वा लिखत। 1x4=4

(i) दग्धां <u>हयशालां</u> विज्ञाय राजा सविषादः जातः।

(अ) पाकशालां (ब) अश्वशालां
(स) पाठशालां (द) वानराणां

(ii) यस्य मानसं शुद्धं सः <u>शुचिः</u>।

(अ) धर्मः (ब) संशयः (स) पवित्रः (द) पण्डितः

(iii) पाप्मानं <u>प्रजहि</u> ह्येन ज्ञानविज्ञाननाशनम्।

(अ) प्रजा (ब) विनाशय (स) नष्टं (द) त्यज

(iv) किं च <u>अनघम्</u>? यदवसरे दत्तम्।

(अ) पूजायै अघम् (ब) न अघम्
(स) अमूल्यम् (द) न अघम् इति।

-o0o-